# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ४** | गुणाः - ७० |
| विषयः - वास्तुशास्त्रम् | (C.C.- 5.3.9. Old & New ) | |
| दिनाङ्कः - ०७/१२/२०१८ | *ग्रन्थः समराङ्गणसूत्रधार* | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां कुरुत ।** **( ५ )**

(१) *यः करोति महावज्रं प्रासादं पुरभूषणम् ।*
*तुष्टो दिवि सादम्पत्यो रमते साप्सरो गणैः ॥*

(२) *एवं विधं च कुरुते प्रसादं इतिवल्लभम् ।*
*सन्तोषयति कन्दर्पं स्याजनेषु स पुण्यभाक् ॥*

**प्रश्नः २ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु ।** **( १० )**

(१) *नन्द्यावर्तलक्षणम् ।*

(२) *सुभद्रप्रासादलक्षणम् ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोःकस्यचिदेकस्य व्याख्यां करोतु ।** **( ५ )**

(१) *विमानः सर्वतोभद्रो गजपृष्ठोऽथपद्मकः ।*
*वृषभो मूककोणश्च नलिनो द्राविडस्तथा ॥*
इत्येतेऽष्टौ समुद्दिष्टाः प्रासादास्त्रिपुरद्रुहः ।

(२) *मेरुमन्दरकैलासा हंसाख्यो भद्र एव च ।*
*उत्तुङ्गो मिश्रकश्चैव तथा मालाधरोऽष्टमः ॥*
*इत्येष्टौ ब्रह्मणः प्रोक्ताः प्रासादाः पुरमध्यगाः ।*

**प्रश्नः ४ अधोलिखितयोः कस्चचिदेकस्य उपरि निबन्धं लिखतु ।** **( १० )**

(१) *विमानलक्षणम् ।*

(२) *गृहराजलक्षणम् ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचिदेकस्य व्याख्यां करोतु ।** **( ५ )**

(१) *प्रासादानथ वक्ष्यामस्तलच्छन्दादनन्तरम् ।*
*तत्र पद्मो महापद्मो वर्धमानस्तथापरः ॥*
स्वस्तिकः सर्वतोभद्रः प्रासादा पञ्चकीर्तिताः ॥

(२) *पट्टिकास्तरमेकं स्यात् ततो वेदस्तरद्वयम्।*

*छेदः स्तरं भवेद् भूयः कण्ठः स्याद् द्विस्तरं ततः॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु।** (१०)

(१) *चतुर्भूमिकस्य लक्षणम्।*

(२) *पञ्चभूमिकस्य लक्षणम्।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचिदेकस्य व्याख्यां करोतु।** (५)

(१) *अन्धारिका हस्तषट्कं विधातव्या समन्ततः।*

*अन्धारिकां च कुर्वीत बाह्यभित्तिं विचक्षणः॥*

(२) *कोणस्त्रिविस्तारः प्रत्यङ्गं स्यात् पदद्वयम्।*

*शाला चतुष्पदा प्रोक्ता चित्रकर्मोपशोभिता॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु।** (१०)

(१) *नन्दिवर्धनस्य लक्षणम्।*

(२) *श्रीवर्धमानलक्षणम् ।*

## पञ्चमान्वितिः

**प्रश्नः ७ केषाञ्चित् दशप्रश्नानामुत्तराणि देयानि।** (१०)

(१) *भगवत्याः कति प्रियप्रासादाः सन्ति ?*

(२) *विष्णुप्रियप्रासादस्य नाम किम् ?*

(३) *हेमकूटनिर्माणस्य फलं किम् ?*

(४) *पूर्वकाले पुष्करप्रसादस्य निर्माणं कः अकरोत् ?*

(५) *त्रैलोक्यनिर्माणस्य फलं लिखतु ?*

(६) *अष्टपञ्चाशोऽध्याये कस्य वर्णनम् अस्ति ?*

(७) *सूर्यस्य कति प्रसादाः सन्ति ?*

(८) *विनायकस्य अपरं नाम किम् ?*

(९) *अष्टपञ्चाशोऽध्याये कति श्लोकाः सन्ति ?*

(१०) *एकोनषष्टितमोऽध्याये केषां वर्णनम् अस्ति ?*

(११) *'कोटि' शब्दस्य कोऽर्थः ?*

(१२) *'जठर' शब्दस्य कोऽर्थः ?*

(१३) *षष्ठितमोऽध्याये कति श्लोकाः सन्ति ?*

(१४) *द्राविडप्रासादयोग्यानि कति पीठानि सन्ति ?*

(१५) *भद्रशब्दस्य कोऽर्थः ?*

--००--